# Hastamalaka stotram

# હસ્તામલકસ્તોત્રમ્

## Document Information

Text title : hastaamalaka stotram

File name : hastaam.itx

Category : vedanta, yoga

Location : doc_yoga

Author : Hastamalaka

Transliterated by : P. P. Narayanaswami at swami at math.mun.ca

Proofread by : P. P. Narayanaswami, Avinash Sathaye sohum at ms.uky.edu

Latest update : June 03, 2007, Nvember 21, 2022

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

November 21, 2022

*sanskritdocuments.org*

# હસ્તામલકસ્તોત્રમ્

(હસ્તામલકીય)

(ઇન્દ્રવજ્રા છન્દ -)

કસ્ત્વં શિશો કસ્ય કુતોઽસિ ગન્તા
કિં નામ તે ત્વં કુત આગતોઽસિ ।
એતન્મયોક્તં વદ ચાર્ભક ત્વં
મત્પ્રીતયે પ્રીતિ વિવર્ધનોઽસિ ॥ ૧॥

હસ્તામલક ઉવાચ ।

નાહં મનુષ્યો ન ચ દેવ-યક્ષૌ
ન બ્રાહ્મણ-ક્ષત્રિય-વૈશ્ય-શૂદ્રાઃ ।
ન બ્રહ્મચારી ન ગૃહી વનસ્થો
ભિક્ષુર્ન ચાહં નિજબોધ રૂપઃ ॥ ૨॥

(ભુજઙ્ગપ્રયાત છન્દ -)

નિમિત્તં મનશ્ચક્ષુરાદિ પ્રવૃત્તૌ
નિરસ્તાખિલોપાધિરાકાશકલ્પઃ ।
રવિર્લોકચેષ્ટાનિમિત્તં યથા યઃ
સ નિત્યોપલબ્ધિસ્વરૂપોઽહમાત્મા ॥ ૩॥

યમગ્ન્યુષ્ણવન્નિત્યબોધ સ્વરૂપં
મનશ્ચક્ષુરાદીન્યબોધાત્મકાનિ ।
પ્રવર્તન્ત આશ્રિત્ય નિષ્કમ્પમેકં
સ નિત્યોપલબ્ધિસ્વરૂપોઽહમાત્મા ॥ ૪॥

મુખાભાસકો દર્પણે દૃશ્યમાનો
મુખત્વાત્ પૃથક્ત્વેન નૈવાસ્તિ વસ્તુ ।
ચિદાભાસકો ધીષુ જીવોઽપિ તદ્વત્
સ નિત્યોપલબ્ધિસ્વરૂપોઽહમાત્મા ॥ ૫॥

યથા દર્પણાભાવ આભાસહાનૌ
    મુખં વિદ્યતે કલ્પનાહીનમેકમ્ ।
તથા ધી વિયોગે નિરાભાસકો યઃ
    સ નિત્યોપલબ્ધિસ્વરૂપોઽહમાત્મા ॥ ૬॥

મનશ્ચક્ષુરાદેર્વિયુક્તઃ સ્વયં યો
    મનશ્ચક્ષુરાદેર્મનશ્ચક્ષુરાદિઃ ।
મનશ્ચક્ષુરાદેરગમ્યસ્વરૂપઃ
    સ નિત્યોપલબ્ધિસ્વરૂપોઽહમાત્મા ॥ ૭॥

ય એકો વિભાતિ સ્વતઃ શુદ્ધચેતાઃ
    પ્રકાશસ્વરૂપોઽપિ નાનેવ ધીષુ ।
શરાવોદકસ્થો યથા ભાનુરેકઃ
    સ નિત્યોપલબ્ધિસ્વરૂપોઽહમાત્મા ॥ ૮॥

યથાઽનેકચક્ષુઃ-પ્રકાશો રવિર્ન
    ક્રમેણ પ્રકાશીકરોતિ પ્રકાશ્યમ્ ।
અનેકા ધિયો યસ્તથૈકઃ પ્રબોધઃ
    સ નિત્યોપલબ્ધિસ્વરૂપોઽહમાત્મા ॥ ૯॥

વિવસ્વત્ પ્રભાતં યથા રૂપમક્ષં
    પ્રગૃહ્ણાતિ નાભાતમેવં વિવસ્વાન્ ।
યદાભાત આભાસયત્યક્ષમેકઃ
    સ નિત્યોપલબ્ધિસ્વરૂપોઽહમાત્મા ॥ ૧૦॥

યથા સૂર્ય એકોઽપ્સ્વનેકશ્ચલાસુ
    સ્થિરાસ્વપ્યનન્યદ્વિભાવ્યસ્વરૂપઃ ।
ચલાસુ પ્રભિન્નઃ સુધીષ્વેક એવ (પ્રભિન્નાસુ ધીષ્વેવમેકઃ)
    સ નિત્યોપલબ્ધિસ્વરૂપોઽહમાત્મા ॥ ૧૧॥

ઘનચ્છન્નદૃષ્ટિર્ઘનચ્છન્નમર્કમ્
    યથા નિષ્પ્રભં મન્યતે ચાતિમૂઢઃ ।
તથા બદ્ધવદ્ભાતિ યો મૂઢ-દૃષ્ટેઃ
    સ નિત્યોપલબ્ધિસ્વરૂપોઽહમાત્મા ॥ ૧૨॥

સમસ્તેષુ વસ્તુષ્વનુસ્યૂતમેકં
    સમસ્તાનિ વસ્તૂનિ યન્ન સ્પૃશન્તિ ।

વિયદ્વત્સદા શુદ્ધમચ્છસ્વરૂપં
    સ નિત્યોપલબ્ધિસ્વરૂપોઽહમાત્મા ॥ ૧૩॥

ઉપાધૌ યથા ભેદતા સન્મણીનાં
    તથા ભેદતા બુદ્ધિભેદેષુ તેઽપિ ।
યથા ચન્દ્રિકાણાં જલે ચઞ્ચલત્વં
    તથા ચઞ્ચલત્વં તવાપીહ વિષ્ણો ॥ ૧૪॥

॥ ઇતિ શ્રીહસ્તામલકાચાર્યરચિતં
    હસ્તામલકસંવાદસ્તોત્રં સમ્પૂર્ણમ્ ॥

The author of Hastamalakiya is Hastamalaka.
Sankaracharya was so much impressed by the hymn
that he wrote a commentary on it.

Encoded and proofread by P. P. Narayanaswami
at swami@math.mun.ca
Corrected by Avinash Sathaye sohum@ms.uky.edu

*Hastamalaka stotram*
pdf was typeset on November 21, 2022

Please send corrections to *sanskrit@cheerful.com*